महर्षीणां भृगुरहं गिरामस्म्येकमक्शरम्।

यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः॥ १०.२५॥

maharṣīṇāṁ bhṛgurahaṁ girāmasmyekamakśaram |
yajñānāṁ japayajño'smi sthāvarāṇāṁ himālayaḥ || 10.25||

अश्वत्थः सर्ववृक्शाणां देवर्षीणां च नारदः।

गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥ १०.२६॥

aśvatthaḥ sarvavṛkśāṇāṁ devarṣīṇāṁ ca nāradaḥ |
gandharvāṇāṁ citrarathaḥ siddhānāṁ kapilo muniḥ || 10.26||

उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवम्।

ऐरावतं गजेन्द्राणां नराणां च नराधिपम्॥ १०.२७॥

uccaiḥśravasamaśvānāṁ viddhi māmamṛtodbhavam |
airāvataṁ gajendrāṇāṁ narāṇāṁ ca narādhipam || 10.27||

आयुधानामहं वज्रं धेनूनामस्मि कामधुक्।

प्रजनश्चास्मि कन्दर्पः सर्पाणामस्मि वासुकिः॥ १०.२८॥

āyudhānāmahaṁ vajraṁ dhenūnāmasmi kāmadhuk |
prajanaścāsmi kandarpaḥ sarpāṇāmasmi vāsukiḥ || 10.28||